Title भार्गवमुहूर्तः

Author

Extent ६ Age

Subject धर्मशास्त्रम्, सम्पूर्णम्,

६ पत्र

नं० ८४२-घ

भार्गवमुहूर्त्तः (धर्मशास्त्रम्)

(संपूर्णम्)

नं० ८४२-घ

पत्राणि ६(षट्)

नं० ८४२-घ
भार्गवमुहूर्त्तः (धर्मशास्त्रम्)
पत्राणि ६ (षट्) (सम्पूर्णम्)

भार्गवसूक्तहस्तपिण्डादि श्लो० १५० ॥

॥श्रीगणेशाय नमः॥ नमस्कृत्य प्रवक्ष्यामि देवदेवं जनार्दनं। अहं वररुचिर्नाम तत्त्वं भार्गवभाषितं १ यानि वाक्यानि शुक्रेण दैत्यमन्त्रे वौ(?)रिणे उक्तानि तानि लिख्यन्ते ग्रंथादाहस्य भार्गवात् २ अथ महेंद्रस्तु धर्मयां कस्मिन् दिने भार्गवमाहूय पप्रच्छ भो भार्गव मदीयं वनं वह्निर्दहतीति इति गिरं देवहूतमुखाद्दैकल्पं गुरुमामंत्र्य इदमवोचत् भगवन् गुरो त्वया साधु परिशोधितमुहूर्ते समारोपितं वनं कथं जातवेदसा दह्यत इति अथैवं पृष्टेन वाचस्पतिनेदमुक्तम् ब्रह्मणा तव निमित्ति श्चतुर्दश भुवनात्मकोरचनाविशेषोऽपापैराक्रांतस्तत्र किंचिच्चमिति एतद्वचनं भार्गवो मदीयं नांगीकुरुते तत्र विषये भवता दाहक्रियायाः किं निदानं ज्ञायते अथ भार्गव आह भगवन् शतक्रतो संवत्सरायनर्तुमासपक्षादिवसमुहूर्तनाडिकाभिर्जगतां कार्यारंभे शुभाशुभयोः प्रोक्तः समयः स्फुटतरो विचिंत्यते उत्तरोत्तरं बलवान् भवति उभयात्मकं फलमपि तत्र तत्राप्युक्तं प्रतिभासते तस्माद्वनर्निर्माणे कार्यारंभे नाडिकानां फलं परिज्ञाने संजाते दाहनक्रियानिमित्तं सुलभमव

बुध्यते इंद्रः पुनरब्रवीत् तर्हि कवे तद्ब्रूहीति पुनराह वननिर्माणसमये
गुरुणा दत्तं मुहूर्त्तमभिजिन्नाम तत्साधु तस्य दोषाः सूक्ष्मा अपि न विद्यंते
एवमेतावानेव गुरोः कालो निश्चीयते न मुहूर्त्तं प्रधानं पृथक्त्वेन नाडिकायाः
कार्यारंभे नाडिका नामधेया कृता सर्वेषु कार्येषु नाडिकैव बलवती सा नाडि
का तु प्रत्येकं ग्रहादिवासरवशात् नानाविधानि शुभाशुभात्मकानि फलानि
स्वस्यां स्वस्यामारब्धस्य कर्मणः पृथक् पृथक् करोति तत्रातिथ्यर्क्षं मुहूर्त्तादि
कं प्रधानम् तेषां तिथ्यर्क्षादीनामानुगुण्ये वैगुण्ये वा नाडिका स्वफलमेकेन
प्रकारेण ददाति अतस्त्वद्वननिर्माणसमये वारमंगारकम् रुद्रं रोहिणीत
स्यां चंद्रेण स्थितम् सर्वासां नाडिकानां वासरवशात् फलदाता चंद्र एव तस्या
वस्थास्त्रिंशत्या प्रत्येकमवस्थायामेकैका घटिका भवति ताश्च ज्योतिस्त्रामे
त्रीसंध्याभिख्याभिधीयंते तदा चंद्रस्यावस्था कृत्तिका नाम तस्याः फलं तु
यत्कर्मारब्धं तदग्निशस्त्रादिभिरुपहन्यत इति अतो वनस्यैव तस्य वन्हेर्दा
हेन भवितव्यम् तस्मात्तद्दाहनमुपजातं इदमेव निदानमिति मम प्रतिभाति
इंद्रः पुनरब्रवीत् त्वया साधूक्तमेतदेव वचनं तु मम नांगीकुरुते यथैतस्य

परिज्ञातारो धरातले जना भविष्यंति तथा वचनं मे भवेदिति भार्गवः पुनरि
दमाह महेंद्र धराजनानां हिताय नाडीतत्त्वं प्रवक्ष्यामि मया गुरूणां च सह
२ सप्तानां ग्रहाणां तत्तदभिधानानि वासराणि सप्त संति तानि भान्वादिगणनी
२ यानि एकैकवारे पुनरुदयमारभ्य पुनरुदयावधि षष्टि नाडिका मिताः स्युः
तत्र द्वैविध्यं पूर्वा त्रिंशत् परा त्रिंशत् ~~[illegible]~~ इति पूर्वा त्रिंशतो यदुदितं तदपर
स्यास्त्रिंशतो भवति ताश्चंद्रमसोऽवस्थात्मिका नाड्यस्तु विशाखामारभ्य सप्तविं
शतिभिर्नक्षत्रनामभिर्ज्योत्स्नामैत्रीसंध्या नामभिश्च व्यवहरणीयाः प्रथम
नाडिका विशाखा द्वितीय नाडिकानुराधा इत्यादि पुनरपराणां त्रिंशन्ना
डिकानामेवमेवंविधत्रिंशदवस्थावस्थितचंद्रः प्रत्येकं वारे वारे ग्रहाणां ना
ड्यां नाड्यां पृथक्पृथक्फलं तत्तद्ग्रहेभ्यः कार्याकार्यैः स्वयमादाय ददाति तानि
फलानि येतानि भानुवारे विशाखायां नाड्यां विवाहादौ कृते शुभं भवति १ अनु
राधायां लाभार्थमुद्योगे कृते लाभो भवति २ ज्येष्ठायां जयार्थमुद्योगे कृते क
लहोपहतं भवति ३ मूले स्वाहितार्थ कर्मणि कृते मातृणां हानिर्भवति ४ पू २
र्वाषाढायां वाणिज्य कर्मणि कृते धनं भवति ५ उत्तराषाढायां दुर्लभवस्तुप्राप्ति

र्थंकर्मणिकृतेआमोदोभवति ६ श्रवणेस्त्रीपुंकर्मशुभंभवति ७ धनिष्ठा
यांधान्यार्थंकर्मणिकृतेअलाभः ८ शतभिषजियात्रायांशुभं ९ पूर्वाभा
द्रपदायामभ्यवहारेअहितं १० उत्तराभाद्रपदायांशारीरकर्मणिकृतेव्याधि
र्भवति ११ रेवत्यांविजयार्थंकर्मणिकृतेशत्रूणांविजयः १२ अश्विन्यांपश्व
र्थंकर्मणिकृतेतेषामभिवृद्धिः १३ भरण्यांपदवंधेशुभं १४ कृत्तिकायां
प्रवेशकर्मणिकृतेहानिः १५ रोहिण्यांपुरग्रामगृहादिकर्मणिकृतेशुभं १६
मृगशीर्षेयात्रायांहानिः १७ आर्द्रायांराजदर्शनार्थंकर्मणिकृतेतत्कार्यसिद्धिः
१८ पुनर्वसौदेवतादिस्थापनेशुभं १९ पुष्येकार्यारंभेसेनामुप[illegible]याति
२० अश्लेषायांव्यवहारेकृतेनिर्धनागतिर्भवति २१ मघायांयुद्धकर्मणिकृ
तेपरिभूतिर्भवति २२ पूर्वाफाल्गुन्यांमैत्रीकर्मकृतेशुभम् २३ उत्तराफाल्गुन्यां
रणकर्मणिविजयः २४ हस्तेऽन्योन्यसंभाषणेआमोदः २५ चित्रायांविक्र
यकर्मणिकृतेलाभोभवति २६ स्वात्यांसंगमकर्मणिकृतेसंततिसंपत्तिः
२७ ज्योत्स्नायांशुभकर्मणिकार्यसिद्धिः २८ मैत्र्यांयत्किंचित्कर्मणिकृतेतद
स्तुविघ्नैरुपहन्यते २९ संध्यायांस्थावरोपयोगिकर्मणिकृतेअतिसुखभागभ
वति ३० एवंरात्रावपि अथसोमवारे विशाखायांशुभंकर्मकुर्यात्

३. अनुराधायां यात्रां कुर्यात् सुदूरगाऽपि सिद्धिमुपयाति २ ज्येष्ठायामात्मजयार्थं कर्म कु-
र्यात् ३ मूले धान्यलाभार्थं कर्म कुर्यात् ४ पूर्वाषाढायां स्नानादि शारीरकर्म कुर्यात् सिद्धि-
३ र्भवति ५ उत्तराषाढायां यत्किंचित्कर्म कृतं तत्सफलं भवति ६ धनिष्ठायां श्रवणे हवि-
कर्म कुर्यात्तत्सिध्यति ७ धनिष्ठायां द्यूतकर्म कृते तत्फलति ८ शतभिषजि राज्यलाभा-
यकर्म कुर्यात्तत्सिध्यति ९ पूर्वाभाद्रपदायां मुक्तिं कुर्यात् १० उत्तराभाद्रपदायां स्त्रीसं-
गतिं कुर्यात् ११ रेवत्यां चारुकर्म कुर्यात्तत्सिध्यति १२ अश्विन्यां युद्धकर्म कुर्यात्
१३ भरण्यामदुष्टकर्म कुर्यात् १४ कृत्तिकायां जयार्थं कर्म कृते जयो भवति १५ रो-
हिण्यां व्याधिचिकित्साकर्म कुर्यात् १६ मृगशीर्षे वस्त्रार्थं कर्म कर्म कुर्यात् १७ आर्द्रायां ज-
यकर्म कुर्यात् १८ पुनर्वसौ प्रवेशकर्म कुर्वीत् १९ पुष्ये भुक्तं विषमप्यमृतं भवति
२० आश्लेषायामुत्सवार्थं कर्म कुर्वीत् २१ मघायां राज्यचिन्तां कुर्वीत २२ पूर्वाफाल्गुन्यां क्री-
डाकर्म कुर्वीत २३ उत्तराफाल्गुन्यां विवादकर्म कुर्वीत २४ हस्ते प्रवेशकर्म कुर्वीत २५ चित्रा-
यां सर्वकार्येषु सिद्धिः २६ स्वात्यां दुस्तरोपलि कर्म कृते तन्ना शमुपयाति २७ ज्योत्स्ना-
यां सेवाकर्म कुर्वीत २८ मैत्र्यां विद्वेषोच्चाटनादिकर्म कुर्वीत २९ संध्यायां शुभकर्म कुर्वीत
३० एवं राज्ञामपि अथ भौमवासरे विशाखायां कर्म कृते मनोदौस्थ्यम् १ अनुराधायां ज-
यार्थं कर्म कृते जयो भवति २ ज्येष्ठायां बलसंग्रामो तत्फलति ३ मूले गजबंधनार्थं क- ३
र्म कुर्वीत ४ पूर्वाषाढायां मुद्गलाभादिकर्म कुर्वीत ५ उत्तराषाढायां तत्संगात्से कर्म कुर्यात्

६ अवरोहयार्थं कर्म कुर्यात् ७ धनिष्ठायां गवार्थं कर्म कुर्यात् ८ शतभिषजि जात्रायां हा
निः ९ पूर्वाभाद्रपदायां मुद्राहार्थं कर्म कृते कन्यालाभो भवति १० उत्तराभाद्रपदायां यत्किंचि
त्कर्मणि कृते शुभम् ११ रेवत्यां पण्यव्यवहारे धान्यलाभः १२ आश्विन्यां गमने कृते प्रीतिः स्या
त् १३ भरण्यां गमने कृते व्याघ्रचोरादिभयम् १४ कृत्तिकायां यत्किंचित्कर्म कृते तदग्नि
शस्त्रादिभिर्नाशमुपयाति १५ रोहिण्यां यत्र कुत्रचित्स्थायी दुर्भिक्षपीडा स्यात् १६ मृगशी
र्षे वस्त्रार्थं कर्म कृते वस्त्रहानिः स्यात् १७ आर्द्रायां यात्राकर्मणि कृते संगतिनाशः स्यात् १८ पु
नर्वसौ वृषध्वजे तन्निवृत्त्यर्थं कुर्यात् शुभं भवति १९ पुष्ये यत्र कुत्रचित्स्थितो हस्तायां सुवार्त्ताश्र
वणं भवति २० आश्लेषायां चिन्ताकर्मणि कृते चिन्तावृद्धिः स्यात् २१ मघायां युद्धकर्मणि कृते
फलहानिः स्यात् २२ पूर्वाफाल्गुन्यां प्रयत्ने विपाना अर्थसंभवः २३ उत्तराफाल्गुन्यां विजयार्थं
कर्म कृते अरिपलायनं स्यात् २४ हस्ते यत्किंचित्कर्म कृते तत्संगतिनाशः २५ चित्रायां सुखार्थं
कर्म कृते आलेपनादेः कान्तो भवति २६ स्वात्यां यात्राकर्मणि कृते विजयः स्यात् २७ ज्योत्स्ना
यां यत्किंचित्कर्म कृते सौख्यम् २८ मैत्र्यां शुभार्थं कर्मणि कृते मनोदौस्थ्यं न स्यात् २९ संध्यायां र
तिकर्मणि कृते अप्रीतिर्भवति ३० एवं रात्रावपि ॥ अथ बुधवासरे विशाखायां यत्र कुत्रचित्स्थि
तो हृतायां दुर्वार्त्ताश्रवणं भवति १ अनुराधायां सद्व्यवहारकर्मणि कृते कार्यभ्रंशः २ ज्ये
ष्ठायां रतिकर्मणि कृते प्रीतिनाशः ३ मूले चित्रकर्मणि कृते चातुर्यं स्यात् ४ पूर्वाषाढायामु

द्योगे कृते निःफलम् ५ उत्तराषाढायां कर्माणि कृते अयत्नाद्योगपीडा न स्यात् ६ श्रवणे कर्माणि कृ
ते यथा कथंचित्कलहो महो भवति ७ धनिष्ठायामुपशांतिकर्म कृते तद्दोषोपशमनं स्यात् ८ शतभि
षजि कर्म कृते अयत्नेन मानलाभः स्यात् ९ पूर्वाभाद्रपदायां युद्धे शत्रुभंगः स्यात् १० उत्तराभाद्र
पदायां धनार्थं कर्म कृते धनलाभः स्यात् ११ रेवत्यां दानकर्माणि कृते तदधिकं भवति १२ अश्विन्याय
दिष्टं करोति तत्फलति १३ भरण्यां सेनाकर्माणि कार्यसिद्धिः १४ कृत्तिकायां प्रासादकर्म कृते
तत्सौख्यं भवति १५ रोहिण्यां परिणयनं कृते कलत्रप्रीतिः स्यात् १६ मृगशीर्षे कर्म कृते अयत्ना
त्प्रासादलाभः १७ आर्द्रायां दुष्टनिग्रहे कृते तत्सफलं स्यात् १८ पुनर्वसौ यत्किंचित्कर्म कृते तल्ला
भो भवति १९ पुष्ये यात्रायां दुर्लभवस्तुप्राप्तिर्भवति २० आश्लेषायां युद्धकर्माणि कृते अरि
विजयो भवति २१ मघायां संगमे पुत्रलाभो भवति २२ पूर्वाफाल्गुन्यां राजदर्शनं कृते तत्सफलं भव
ति २३ उत्तराफाल्गुण्यां केनापि समं बले मैत्री स्यात् २४ हस्ते अप्यवहारे बलवृद्धिः २५ चित्रायां
यत्किंचित्कर्म कृते सुखं भवति २६ स्वात्यां वाणिज्यात्लाभः २७ ज्योत्स्नायां सुहृदागमनादतिप्रीतिः
२८ मैत्रां कर्माणि तत्फलयति २९ संध्यायां दाहनादिकर्माणि तन्नाशमुपयाति ३० एवं परास्वपि अ
थ बृहस्पतिवारे विशाखायां धनोद्देश कर्म कृते तद्वृद्धिः १ अनुराधायां यत्नकृते नष्टद्रव्यसिद्धिः
स्यात् २ ज्येष्ठायामप्यवहारकर्माणि कृते शरीरपीडा भवति ३ मूले कर्माणि कृते केनापि सुगंधव
स्तूनीतं भवति ४ पूर्वाषाढायां विद्याकर्म कृते वचःप्रवीणं स्यात् ५ उत्तराषाढायां कर्माणि कृते दुः
खं भवति ६ श्रवणे उद्योगे कृते विजयः ७ धनिष्ठायां संग्रामादि कृते अरिभंगः ८ शतभिषजि वरणा

कर्म

दिकर्म कृते तत्प्रीतिः ९ पूर्वाभाद्रपदायां पशुलाभार्थं कर्म कृते तल्लाभः १० उत्तराभाद्रपदायां पण्यव्य
वहारे धान्यलाभः ११ रेवत्यां यात्राकर्म कृते पुनर्गते राजा भवति १२ अश्विन्यामुत्सवादिकर्म कृते संतो
षः १३ भरण्यां चित्रकर्माणि कृते व्याध्युपद्रवः १४ कृत्तिकायां कर्म कृते सुभगत्वम् १५ रोहिण्यां गम
ने कार्यनाशः १६ मृगशीर्षे युद्धे कृते यथाकथंचि-च्छत्रुहतः स्यात् १७ आर्द्रायां यत्किंचित्कर्म कृते
प्रयोजनसिद्धिः १८ पुनर्वसौ युद्धे कृते बलक्षयः १९ पुष्ये यात्राकर्माणि कृते सर्पेन विनाशः २०
आश्लेषायां यात्राकर्म कृते क्रियाः सिद्धिः २१ मघायां पोषार्थं कर्म कृते बलं भवति २२ पूर्वाफाल्गु
न्यां कर्माणि कृते कुत्रापि बंधुजनमृतिः २३ उत्तराफाल्गुन्यां कार्यारंभे कृते धैर्यासिद्धिर्धेयः २४ हस्ते
स्नेहे कृते विद्वेषः २५ चित्रायां कर्माणि कृते प्रीतिर्न भवति २६ स्वात्यां विवादकर्माणि कृते जयः २७ ज्यो
त्स्नायां यात्रायां मृतिः २८ मैत्राभयागमने कर्म कृते तत्प्रभंगो भवति २९ संध्यायां यात्रार्थं कर्माणि कृ
ते तत्सिद्धिर्भवति ३० एवं परास्वपि अथ मदीये वारे विशाखायां कर्माणि कृते वनिताजनाद्दत्त
सौख्यं भवति १ अनुराधायां देवार्थं कर्म कृते सिद्धिर्भवति २ ज्येष्ठायां कर्म कृते अयत्नेनार्थप्राप्ति
र्भवति ३ मूले कर्माणि कृते अकस्मात्सुहृदागमः ४ पूर्वाषाढायां वारुणसूक्त कर्म कृते उग्रवृष्टिः
स्यात् ५ उत्तराषाढायां सस्यार्थं कर्म कृते सस्यवृद्धिः ६ श्रवणे कर्म कृते जातरोगस्य मृतिः ७ धनि
ष्ठायां सेनार्थं कर्म कृते सेनापतिः स्यात् ८ शतभिषजि उद्योगे कृते तत्सनाशः स्यात् ९ पूर्वाभा
द्रपदायां वार्त्ता मुखेन कार्यलाभो भवति १० उत्तराभाद्रपदायां कलहे कृते तद्दुःखनाशो भवति ११ रेव
त्यामरातिसंधि कर्म कृते तत्सिद्धिः १२ अश्विन्यां विद्यारंभे तल्लाभः १३ भरण्यां किंचित्सत्कर्माणि
तत्साकल्यम् १४ कृत्तिकायां कर्माणि अजातरोगमृतिः १५ रोहिण्यां जयार्थं कर्म कृते श
त्रुभोरत्नादिलाभः १६ मृगशीर्षे कर्म कृते फलनाशः १७ आर्द्रायां धनुर्विद्याकर्म कृते सिद्धिः १८

५ पुनर्वसौ भोजनादिकर्म कृते सौख्यहानिः १९ पुष्ये कर्म कृते वंध्याहतिर्भवति २० अश्लेषायां ग्रा
हणार्थं कर्म कृते तस्य लाभः २१ मघायां स्त्रीसंभाषणे प्रमोदो भवति २२ पूर्वाफाल्गुन्यां यत्किं
चित्कर्म कृते उद्योगपरंपरा स्यात् २३ उत्तराफाल्गुन्यां मंत्रासगमनकर्म कृते तस्यावमोदः २४
हस्ते कर्मणि कृते ऽर्थनाशः २५ चित्रायां कर्म कृते दुःखं भवति २६ स्वात्यां वेषम्योपशीतलता
२७ ज्योत्स्नायां सुखार्थं कर्म कृते सुखं स्यात् २८ मैत्र्यां शुभार्थं कर्म कुर्यात् २९ संध्यायां कर्मणि
कृते पारमार्थकार्यहानिः ३०॥ एवं परा स्वपिनाडिषु अथ शनिवासरे विशाखायां कलहादि कर्म
कुर्यात् १ अनुराधायां राजदर्शनार्थं कर्म कृते सौख्यप्राप्तिः २ ज्येष्ठायां कर्म कृते रिपुवृद्धिः ३
मूले मित्रसंभाषणार्थं कर्म कुर्यात् ४ पूर्वाषाढायां विग्रहकर्मणि विजयः स्यात् ५ उत्तराषा
ढायां तुरंगमादिलाभार्थं कर्म कुर्यात् ६ श्रवणे गमनकर्मणि प्रमोदनाशः ७ धनिष्ठायां प्रशं
साकर्मणि तत्सिद्धिः ८ शतभिषजि यत्किंचित्कर्म कृते आमयोपक्रमः ९ पूर्वाभाद्रपदायां मन
र्योपशमनकर्म कुर्यात् १० उत्तराभाद्रपदायां स्त्रीसंभोगकर्म कुर्यात् ११ रेवत्यां यत्किंचित्कर्म
कृते पुत्रहानिः १२ अश्विन्यां वंधुवृद्धिबलेन सिद्धिफलम् १३ भरण्यां क्रियासंस्थंभकर्म कुर्यात्
१४ कृत्तिकायां प्रवृत्तिकर्म कुर्यात् १५ रोहिण्यां धातुद्रव्यागमनार्थं कर्म कुर्यात् १६ मृगशीर्षे
यात्राकर्मणि कृते शुभम् १७ आर्द्रायां संस्थितिकर्मणि हानिः १८ पुनर्वसौ कर्म कृते बहुलम्
१९ पुष्ये नानाविधधान्यलाभार्थं कर्म कुर्यात् २० अश्लेषायां धनवृद्धिकर्म कृते तत्सिद्धिः २१
मघायां वनितागमनार्थं कर्म कुर्यात् २२ पूर्वाफाल्गुन्यां पानिं स्वता २३ उत्तराफाल्गु
न्यां वीरकर्मसिद्धिः २४ हस्ते वधुः सौख्यम् २५ चित्रायां कर्म कृते चिंतानाशयता ५

६

२६ स्वातौ रिपुसंधानं सिद्धिः २७ ज्येष्ठायां कर्मकृते मृत्युः २८ मैत्र्यां कर्मकृते
क्रोधोपशमः २९ संध्यायां तडागादि कार्यसिद्धिः ३० एवं रात्राववपि ज्ञेयम्
इति श्रीमद्धरसूचिविरचितायां भाषैव मुहूर्त्तोऽयं समाप्तम् शुभं भवतु तेरां

6

॥ ६० ॥ श्रीगणेशाय नमः ॥ सएव जीवो विवरप्रसूतेति मूलश्लोकस्य टीका तां विविधां भारतीं प्र
पद्येयास्तां भारतीं मित्रावरुणसदनात् आगमी वामस्थानात् उच्चरंती उद्भवंती मित्रोग्निः वरुणः
सोमस्तयोः सदनं आवोः संस्थाने परमात्मा यतः प्राणश्वासस्पर्शितो हि तडप लव्यतेन तस्मादु
च्चरंती त्रिषष्टिवर्णान् जनयति वायुसंगजातानू प्रकट करणैः वुद्धिगतैः प्रतत्यत्वे हिंद्वियैरं
तः पश्यंति नलक्षीरयति सा पश्यंतीत्यभिविताख्या तां प्रथमोत्तलतो बुद्धिसंस्था उच्चारयामी
ति विचारयुक्तो मध्यमां मुखे स्थितां करणविशदां स्थानप्रयत्नैः निर्मलां वैखरीं च प्रपद्ये त्रि
षष्टिवर्णानिति तान्नेवाह हस्वदीर्घप्लुतभेदेन स्वराः एकविंशतिः ऋतुनासिकाः पंचविसर्गानु
स्वारौ क ध्वोच्चेति त्रय इ उ वर्णाचि विधानवत् लृवर्णः प्लुतहीनो द्विविधः दीर्घहीनः संध्यक्षराण्येवमे
वाष्टौ एवमेकविंशतिस्वराः स्पर्शाः पंचविंशतिः कादिमांताः यादयो हांताः अंतस्था अनुस्वार ऊष्मा
ण अनुस्वारश्च ॥ ६७ ॥

६

१५० ८४२